# ॥ श्री देवी ताण्डव स्तोत्र ॥

# ◻ Shri Devi Tandava Stotra ◻

**॥ ॐ गण गणपतये नमः ॥**

अमरतापसभूपसुरयोगिभिर्नुतपदाबुरुहे प्रणमास्पदे
निगममूर्धिनि नित्यविनोदिनि भवभयाभवमां परमेश्वरी ।

**अथ कुदाचित्**

अकारोकारमकारबिन्दुनादस्वरूपिणी ।अखिलजगदैककारिणी ।अखण्डपरिपूर्ण सच्चिदानन्द स्वरूपिणी ।अरुणकोटिकोटि प्रकाशदर्शिताश्रयाशार्कसोममण्डला नामुपरि ।श्रीसादाख्य कलारूपत्वेनसाक्षिरूपतया ।अनेककोटि ब्रह्माण्डानां । देवमनुश्यतिर्यग्योनिजातीनां ।स्तापरजङ्गमाण्डजाति चतुर्विधयोनि जातानां ।

तेशुत्तममध्यमाधमानां ।पुण्यमिश्रपापकर्मानु जातानामपि ।
अतलवितलसुतलतलातल महातल रसातल पातालसप्तधौलोकानां
भूर्भुवादिसप्तोर्ध्वलोकानां ।सर्गस्थिति प्रलयहेतुभूततया ।निरञ्जनाकरतया ।
नित्यशुद्धबुद्धमुक्तसत्य परमानन्दस्वरूपया वर्तमाने ।इन्दुचूडप्रिये ।

शोडशकलाभारिन्दुरिव चन्द्रज्ञानविद्यायां प्रतिवादिते ।
नित्यानन्दैकरसानुभवचित्तानां
निर्मलानां ।द्वैत प्रपञ्चवासनाव्यतिरक्तकलिमलदोशाणां ।शुद्धबोधानन्दाकार सविन्मये पावके ।सञ्चितागामिसकप्रारब्धकर्मोत्भव सुखसुखादिर्भिद्रवैर्यजतां ।
हुताशीनां निखिललोकैकसाक्षित्वेन ।सर्वमङ्गलोपेतशिवस्वरूपत्वेन ।
तुर्यातीत

निश्चलनिर्विकल्प ।सजातीय विजातीय स्वगतभेदरहित्वेन ।त्रैपुटीसाक्षित्वेन ।
शरीरत्रय विलक्षणरूपतया ।अवस्थात्रय साक्षित्वेन पञ्चकोशव्यतिरक्त्वत्वेन

सच्चिदानन्दस्वरूपतया ।तत्वमस्यादि महावाक्यजन्यज्ञानज्ञेय स्वरूपतया
शुद्धस्वयं प्रकाशे ज्योतिस्वरूपे ।परब्रह्मणी ।दीनवृत्तीनां अर्थपुत्रमित्रकलत्र-

सदनादिसंबन्धै:संसारै:कामक्रोधलोभमोहमदमात्सर्यरागद्वेशादिभिर्मेघैर्निमुक्ते
दहराकाशेतिशुचौ दशादि पञ्चदशकलाभिस्सकलरूपत्वेन ।श्री
सदाख्याभिधानया
कलया निश्कलस्वरूपत्वेन ।पूर्णकारतयाच शशभृद्दिविविद्यामाने ईश्वरस्य
गृहणी ।
ईश्वररुद्रविष्णुब्रह्माणां व्युत्क्रमेन सृष्टिस्थितिसंहार तिरोधान कर्तृभूतानां ।

नकारमकारशिवकाराणामपि हेमस्फटिक माणिक्यनीलवर्णानां मूलाधारं विहाय
चतुश्चत्वारिशद्वर्णनां पदानामुपरि यो ।यकाररूप: सदाशिव: तटिज्वलेवानु
मय्यानुग्रहशक्त्या अतिसूक्ष्माकार गगनाकारतयावर्तते ।तदाकाफलकांविधाय
एतादृशगुणविशिष्टदिवसनो वेदवेदाङ्गवेदान्तादि सकलमताधिष्ठान रूपतया
।

शैवागमोक्तप्रकारात् ।ॐकार स्वरूपतया ।शाक्तानुगतसकलशास्त्राणां ।
पूर्वापरपक्षाणां ।एकीभूताधारेय लक्ष्यस्वरूपतया ।ह्रींकारस्वरूपतया ।
च अथवा परमरहस्याकारायां श्रीपञ्चदशाक्षर्यांआत्मविद्यामतिशूच्यां
हरिहरविरिञ्चादिभिरभ्यर्च्चमानियां ।तस्योपासकानां ।ईकारसहितश्रीकार

रेफबिन्दुस्वरूपतया विराजमाने ।उत्कृष्टकर्मोपासना योगैश्वर्यादिशुविनुर्मुक्त-
चित्तानां शुद्धोपनिशत् संभृत वेदान्त वाक्यार्थवेदीनां
परमहंसानांवरिष्ठवृतीनामति
वर्णाश्रम प्रवृत्तानांतत्वविदां नादरूपरहितानन्दाकार विश्वतैजस प्राज्ञानामपि
विराट्
हिरण्यगर्भान्तर्यामिणाञ्च प्रजापत्य चिज्वलित शान्तानां मूलाधार

स्वाधिष्ठानमणिपूरकानां हत विशुध्याज्ञाचक्राणामुपरि चतुर्विंशति तत्वानश्च
सर्वज्ञ सर्वाकारण सर्वेश्वर सर्वान्तर्यामि सर्वसृष्टि सर्वस्थिति सर्वसंहार
सप्तोपाधिभि:

र्जहदजहत् लक्षणया सोयं देवतत्तेत्यखण्डवाक्यानुवृत्या ।शिवकारतया च परमात्मस्वरूपेण भासमामाणे आदिव्याधि उत्भव दुखैरतितीव्रै व्रजभिः

गृहक्षेत्रधनधान्य पुत्रमित्रकलत्रादिभिः रतिभयानकैजलजन्तुभिः दुस्तरे महावारिधौ
निमग्नमतिदीनं मां त्वदीयया भक्तरक्षणनिपुणया करुणाद्रया दृष्टचा उद्धरोद्धर रक्षरक्षत्वच्चरणारविन्दे निवेशय निवेशय ॥

**॥ इति श्री देवी ताण्डव स्तोत्रम् सम्पूर्णम ॥**

allastrologysolutions.com